दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणकृष्णनवमी
श्रावण 22 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-7 ■ वर्ष-5 ■ अङ्क-289 | 1 | अगस्त 08, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 विश्व-एथलेटिक्स-अन्तर्-विंशति-वर्षीय-स्पर्धायाम् भारतस्य मोहम्मद अशफाकः विजयं प्राप्तवान्

3 हमीरपुरस्य बड़सरे मुख्यमन्त्री सुक्खू: करिष्यति राज्यस्तरीय-स्वतन्त्रतादिवस- समारोहस्य अध्यक्षता

6 पाण्डुलिपीनां संरक्षणाय, अङ्कीकरणाय (डिजिटलीकरणाय) तथा अनुसन्धानस्य संवर्धनाय पाणिनिविश्वविद्यालये पाण्डुलिपिकेन्द्रस्य शुभारम्भः

## Monsoon Session 2026-संसदा सूक्ष्म-लघु-मध्यमोद्द्यम-विकास-संशोधन विधेयकं, विंशतिः षड्विंशतिः पारितम्




**हिमसंस्कृतवार्ता, नवदेहली।** संसदा सूक्ष्म-लघु-मध्यमोद्यम-विकास-संशोधन विधेयक, विंशतिः षड्विंशतिः पारितम्। लोकसभया एतद् विधेयकम् अनुमोदितम्। राज्यसभया एतत् गतसोमवासरे एव पारितम् आसीत्। विधेयकस्य पारणानन्तरं पीठासीनाधिकारी दिलीप-सैकिया विरोधं कुर्वद्भ्यः सदस्येभ्यः सदनस्य कार्यचरणं सुचारुरूपेण सञ्चालने सहयोगं कर्तुम् आह्वानम् अकरोत्। व्यवधानानां विषये असौ असन्तोषं प्रकटयन् अवदत् यत् एतादृशः विरोधः देशस्य लोकतान्त्रिक-व्यवस्थायै न शोभते। संसदीयकार्यमन्त्री किरणरिजिजूः अपि विपक्षस्य आचरणविषये चिन्तां प्रकटयन् अवदत् यत् केन्द्रीयगृहमन्त्री अमितशाहः संसदीयसत्रस्य अवधौ नियमितरूपेण संसदि उपस्थितः भवति तथा चिररात्रि यावत् सदने एव तिष्ठति। नैरन्तर्येण कोलाहलकारणेन पीठासीनाधिकारिणा सदनस्य कार्याचरणं सोमवासरे प्रातः एकादशवादनपर्यन्तं स्थगितम्। ततः पूर्वं प्रातः एकादशवादने सदनस्य कार्यारम्भे सति लोकसभाध्यक्षः ओम बिरला इत्येषः 'भारत-छोड़ो आन्दोलन' इत्येतस्य स्वतन्त्रतासेनानिभ्यः अथ दिवङ्गतेभ्यः च श्रद्धाञ्जलिम् अर्पितवान्। महात्मनः गान्धिनः ऐतिहासिकं "करो या मरो" इत्याह्वानं स्मरन् असौ तम् आन्दोलनं राष्ट्रियैक्यस्य, साहसस्य, सत्यस्य, अहिंसायाश्च चिरस्थायि-प्रतीकम् इति प्रतिपादितवान्। तदनन्तरं लोकसभाध्यक्षः प्रश्नकालम् आरब्धुं प्रयत्नम् अकरोत्, किन्तु विपक्षसदस्यैः छात्रान्दोलनेषु कथितारक्षक-कृतकार्यस्य विषयः उत्थापितः। विपक्षसदस्याः अस्मिन् विषये केन्द्रीयगृहमन्त्रिणः अमितशाहस्य वक्तव्यं प्रार्थयन्तः आसन्।

### विपक्षस्य कोलाहलात् राज्यसभायाः कार्याचरणम् अपि आदिवसं यावत् स्थगितम्

छात्रान्दोलनेषु कथितारक्षकैः कृतकार्याणि नीट्-सम्बद्ध-विभिन्नविषयं च समर्थीकृत्य विपक्षस्य कोलाहलात् राज्यसभायाः कार्याचरणम् अपि आदिवसं यावत् स्थगितम्। अपराह्णे द्वादशवादने प्रथमस्थगनानन्तरम् सदनस्य कार्याचरणं पुनः समारब्धम्। तदा सभापतिः सी. पी. राधाकृष्णन् विपक्षस्य कोलाहलमध्ये प्रश्नकालम् आरब्धवान्। अस्मिन् समये केन्द्रीयरेलमन्त्री अश्विनीवैष्णवः रेलविभागे कवच-सुरक्षाप्रणाल्याः तथा सङ्केतव्यवस्थायाः स्थापनसम्बद्धस्य प्रश्नस्य उत्तरं दातुं प्रयतितवान्, किन्तु स्वोत्तरं सम्पूर्णतया प्रस्तोतुं न अशक्नोत्। नैरन्तर्येण कोलाहल-कारणेन सभापतिना सदनस्य कार्याचरणं सोमवासरे प्रातः एकादशवादनपर्यन्तं स्थगितम्। इतः प्राक् प्रातः एकादशवादने सदनस्य समारम्भे सति सभापतिः सी. पी. राधाकृष्णन् अवदत् यत् अगस्तमासस्य नवम-दिनाङ्के 'भारत छोड़ो आन्दोलन' इत्यस्य चतुरशीतितमः स्मृतिवर्षः वर्तते। सः अवदत् यत् एतद् आन्दोलनं महात्मनः गान्धिनः दूरदर्शितत्वम् आसीत्। सः एतदपि अवदत् यत् 'भारत छोड़ो आन्दोलन' इति भारतस्य स्वातन्त्र्यसङ्ग्रामस्य महत्त्वपूर्णः कीर्तिस्तम्भः अस्ति, यः अद्यापि देशभक्तेः, राष्ट्रियैक्यस्य अथ निःस्वार्थराष्ट्रसेवायाः च आदर्शः युवकान् प्रेरयति ।

## राष्ट्रपतिपदासीना द्रौपदी मुर्मुः 'राष्ट्रिय-हस्तनिर्मित-तन्तुकला-पुरस्कारान् प्रदत्तवती



राष्ट्रपतिपदासीना द्रौपदी मुर्मुः नवदेहल्या: राष्ट्रपति-भवने पञ्चविंशत्युत्तरद्विसहस्र-तमवर्षस्य 'सन्त कबीर-हस्तनिर्मित-तन्तुकला-पुरस्कारान्' 'राष्ट्रिय-हस्तनिर्मित-तन्तुकला-पुरस्कारान्' च प्रदत्तवती । हस्त-शिल्पिनां कलात्मकताम्, नवीनताम्, भारतीय-परम्परायाः संरक्षणे तेषाम् योगदानञ्च सम्मानयितुम् आहत्य द्वाविंशतिः पुरस्काराः, त्रयः सन्त कबीर पुरस्काराः एकविंशतिः च राष्ट्रिय पुरस्काराः समर्पिताः। अस्मिन् अवसरे भारतस्य समृद्ध-न्यासस्य सम्माननाय चतस्रः स्मरणीय-प्रैष्य-चिटिकाः अपि विमोचिताः। द्वादशस्य राष्ट्रिय-हस्तनिर्मितकला-दिवसस्य अवसरे कार्यक्रमे भाषमाणा राष्ट्रपतिः प्रोक्तवती यत् एतत् क्षेत्रं केवलं जीविकायाः साधनं न भूत्वा समावेशि-विकासस्य सशक्तं माध्यमम् अपि अस्ति। सा अवदत् यत् सहस्रेभ्यः वर्षेभ्यः हस्ततन्तु-कला भारतस्य सांस्कृतिक-रिक्थ-यात्रयोः अभिन्नः अङ्गः वर्तते। राष्ट्रपतिः देशस्य वस्त्र-शिल्पिभ्यः, उद्यमिभ्यः, छात्रेभ्यः अथ अस्य क्षेत्रस्य समस्त जन समुदायाय च शुभकामनाः प्रदत्तवती ।

## अद्यतनीयं सुभाषितम्

हितं मितं प्रियं काले वश्यात्मा योऽभिभाषते।
स याति लोकानाह्लादान् ह्लादयन्निव मानवः॥
(विष्णुपुराण- ०३/१२)

अर्थात्- जो संयमी पुरुष समयानुकूल, हितकर, मर्यादित और प्रिय वचन बोलता है, वह स्वयं भी सुख पाता है और दूसरों को भी सुख देता है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## पाकिस्तान-देशेन सह भारतस्य सम्बन्धाः केवलम् आतङ्कवादमुक्तौ एव अग्रे सारयितुं शक्यन्ते

विदेशमन्त्री डॉ.एस. जयशङ्करः न्यगादीत् यत् पाकिस्तान-देशेन सह भारतस्य सम्बन्धाः केवलम् आतङ्कवादमुक्तौ एव अग्रे सारयितुं शक्यन्ते । लोकसभायाम् एकस्मिन् लिखितोत्तरे डॉ. जयशङ्करः स्पष्टीकृतवान् यत् पाकिस्तानः अद्यापि अतिसीम्नि भारतं विरुध्य आतङ्कवादं अस्त्ररूपेण उपयुङ्क्ते। मन्त्री अब्रवीत् यत् पुलवामा-आतङ्की-आक्रमणानन्तरम् भारतेन पाकिस्तान-देशाय प्रदत्तम् अति-वरीयान्-राष्ट्रस्य इति प्रत्याहृतम्। सहैव ततः आयातितानां सर्वेषां वस्तूनामुपरि सीमाशुल्कं द्विशत-प्रतिशतं यावत् वर्धितम्।

### -ऋतु-विज्ञानविभागेन नवदेहल्यां मध्यमतः तीव्रवृष्ट्यै पीतवर्णपरा सञ्चेतना प्रख्यापिता

भारतस्य उत्तर-पश्चिम-भागेषु अतिवृष्टिः अजायत् । भारत-ऋतु-विज्ञानविभागेन नवदेहल्यां मध्यमतः तीव्रवृष्ट्यै पीतवर्णपरा सञ्चेतना प्रख्यापिता । सहैव अस्य मासस्य द्वादश-दिनाङ्कं यावत् जम्मू-कश्मीर-लद्दाख गिलगित-बाल्टिस्तान-मुज़फ़्फ़राबाद-हिमाचलप्रदेश-उत्तराखण्ड-राज्येषु अविरत-वृष्टेः सम्भावना वर्तते । ओपिशा-राज्ये वृष्ट्या पुनरेकवारम् जलौघस्य आशङ्का प्रबला दृश्यते, तत्र पूर्वतन-जलप्लावेन प्रभावितेषु क्षेत्रेषु आपदुद्धरणकार्याणि प्रवर्तन्ते । अतिवृष्टेः सम्भावनाम् अवलोक्य राज्यप्रशासनेन आपद्-प्रबन्धनाभिकरणैः च संवेदनशील क्षेत्रेषु सतर्कता, निरीक्षणं च तीव्रीकृतम्। अपरत्र केरलम्-राज्यस्य चतुर्षु उत्तरीय-जनपदेषु तीव्रवृष्टिपरः रक्त-वार्णिक-सङ्केतः प्रकाशितः। कोझिको कन्नूर-वायना कासरगो क्षेत्रेषु साम्प्रतं रक्तवर्णपरा सञ्चेतना प्रख्यापिता।

# प्रधानमन्त्री नरेन्द्रमोदी स्वकीयावासे एन०पी०ए०-संयुतौ नव-सम्मिलितैः विविध-सदस्यैः सह मिलितवान्



प्रधानमन्त्री नरेन्द्रमोदी गतदिने स्वकीयावासे एन०पी०ए०-संयुतौ नव-सम्मिलितैः विविध-सदस्यैः सह मिलितवान् । एतेषु राष्ट्रवादी-काङ्ग्रेस पार्टीति दलस्य अथ शिवसेनादलस्य सदस्याः च समाविष्टाः । उपवेशनानन्तरं संसद् परिसरे वार्ताहरैः सह सम्भाषमाणा शिवसेना-सांसद् ज्योति-सावित्री-नागनाथ-वाघमारे इत्येषा प्रावोचत् यत् प्रधानमन्त्रिणा संसदि अनुक्षणम् जायमानेषु व्यवधानेषु गहनचिन्ता प्रकटीकृता। सा अकथयत् यत् प्रधानमन्त्रिणा अवलोकितं यत् निरन्तर स्थगनेन व्यवधानेन च नवनिर्वाचिताः, प्रतिभाशालिनश्च सदस्याः सदने स्वकीय-विचारान् उपस्थापयितुं नैव पारयन्ति।

## भारतस्य ग्रैण्ड-मास्टर् आर्. प्रग्गनानन्दः अमेरिकादेशे आयोजितायां ग्रैण्ड् चेस् टूर् सेन्ट् लूइस् रैपिड् एण्ड् ब्लिट्ज् इत्यस्यां प्रतियोगितायां विजयं प्राप्तवान्



क्रीडावार्तासु, भारतस्य ग्रैण्ड-मास्टर् आर्. प्रग्गनानन्दः अमेरिकादेशे आयोजितायां ग्रैण्ड् चेस् टूर् सेन्ट् लूइस् रैपिड् एण्ड् ब्लिट्ज् इत्यस्यां प्रतियोगितायां विजयं प्राप्तवान्। विंशतिवर्षीयः प्रग्गनानन्दः पेनल्टीमेट इत्यस्मिन् चक्रे उज्बेकिस्तानस्य ग्रैण्ण मास्टर् जावोखिर् सिन्दारोव् इत्यनेन सह स्पर्धां समीकृत्य विजयं सुनिश्चितवान्।

## कोरिया मास्टर्स बैडमिण्टनप्रतियोगितायां भारतस्य क्रिडिके अश्मिता चालिहा च उपान्त्यचक्रे प्रवेशिते




बड्ड्रामण्टन्-क्राडाया भारतस्य क्राडक राक्षता रामराज् अथ अश्मिता चालिहा च गतदिने दक्षिणकोरियादेशस्य आसन्-नगरे आयोजितायाः कोरिया मास्टर्स इत्यस्याः स्पर्धायाः महिलैकलवर्गे उपान्त्यचक्रे प्रवेशम् अलभेताम्। प्रागुपान्त्यचक्रे रक्षिता रामराज् स्वदेशस्य क्रीपिकां तन्वी शर्मा इत्येतां पराजितवती । इदानीं उपान्त्यचक्रे एषा भारतस्य अश्मिता चालिहा इत्येतां सम्मुखीकरिष्यति। अश्मिता चालिहा जापानदेशस्य क्रीणिकां हिना अकेचि इत्येतां पराजित्य उपान्त्यचक्रे प्रवेशम् अकरोत्।

# विश्व-एथलेटिक्स-अन्तर्-विंशति-वर्षीय-स्पर्धायाम् भारतस्य मोहम्मद अशफाकः विजयं प्राप्तवान्




अमेरिकादेशस्य यूजीन्-नगरे आयोजितायाम् विश्व-एथलेटिक्स-अन्तर्-विंशति-वर्षीय-स्पर्धायाम् भारतस्य मोहम्मद अशफाकः इत्यनेन अन्तर्-विंशति-वर्षीय-वर्गस्य राष्ट्रिय-कीर्तिमानं भग्नम्। अनेन विजयेन सह अशफाकः पुरुषाणां चतुश्शत-मीटर-धावनस्पर्धायाः उपान्त्य-चक्रप्रविष्टवान्। नवदशवर्षीयः अशफाकः प्रथम-चक्रस्य पञ्चम-धावने अमेरिकादेशस्य जेडेन डी लियोन-वर्यस्य पश्चात् द्वितीय-स्थानं प्राप्य ४५.८१ (पञ्चचत्वारिंशत्-दशमलव-एकाशीतिः) क्षणान् गृहीतवान्, आहत्य च चतुर्थ-स्थानं लब्ध्वा उपान्त्य-चक्रं प्राविशत्। पुरुषाणाम् उच्च-कूर्दने भारतस्य बसन्त-वर्यः २.१४ (द्वि-दशमलव-चतुर्दश) मीटर-मितं प्रांशु-कूर्दनं कृत्वा अन्तिम-चक्रं प्राविशत्, 'क'-वर्गस्य योग्यता-स्पर्धायां (Qualifying Group-A) च पञ्चम-स्थानम् अलभत। महिलानां चक्र-क्षेप-प्रतिस्पर्धायाः (Discus Throw) अन्तिम-चक्रे भारतस्य अमानत कंबोज-वर्या वैयक्तिक-श्रेष्ठ-प्रदर्शनं कुर्वती षष्ठं स्थानं गृहीतवती। सा अस्मिन्नेव सत्रे अप्रैल-मासे रचितं स्वकीयमेव ४६.०५ (षट्चत्वारिंशत्-दशमलव-शून्य-पञ्च) क्षणानां राष्ट्रिय-कीर्तिमानम् अपि परिष्कृतवती।

# हरियाणा-राज्यस्य मुख्यमन्त्री नायब सिंह सैनी मानेसर-नगरे राज्यस्तरीय-वन-महोत्सवस्य द्वितीय-चरणस्य शुभारम्भम् अकरोत्



हरियाणा-राज्यस्य मुख्यमन्त्री नायब सिंह सैनी मानेसर-नगरे वृक्षारोपणं कृत्वा सप्तसप्ततितमस्य (७७) राज्यस्तरीय-वन-महोत्सवस्य द्वितीय-चरणस्य शुभारम्भम् अकरोत्। एतेन सह प्रदेशस्य विविध-जनपदेषु मन्त्रिभिः, सांसद्-सदस्यैः, विधानसभा-अध्यक्षेण, उपाध्यक्षेण, विधायकैः तथा अन्यैः जनप्रतिनिधिभिः अपि वृक्षारोपणं कृत्वा पर्यावरण-संरक्षणस्य सन्देशः दत्तः। मुख्यमन्त्रिणा उक्तं यत् मानेसर-गुरुग्राम-नगरयोः अभिज्ञानम् हरितत्वेन, स्वच्छ-वायुना तथा प्रकृत्या अपि स्थास्यति इति सर्वेषां सामूहिकं दायित्वम् अस्ति। सः अवदत् यत् एषः केवलं पादपारोपणस्य कार्यक्रमः नास्ति, अपि तु प्रकृतेः प्रति स्वस्य ऋण-शोधनस्य अवसरः अस्ति। सः अकथयत् यत् अद्य सम्पूर्णं जगत् पर्यावरण-संरक्षणस्य चर्चां करोति, यदा तु भारते सहस्रवर्षेभ्यः पूर्वमेव प्रकृतेः पूजनं भवति। प्रकृतेः रक्षणं सनातन-संस्कृतेः मूल-संस्कारः अस्ति। मुख्यमन्त्रा उक्तं यत् प्रधानमन्त्रिणा नरेन्द्र मोदिना अस्मभ्यं सर्वेभ्यः देशवासिभ्यः "एकः वृक्षः मातुः नाम्ना" (एक पेड़ मां के नाम) इति भावपूर्णः मन्त्रः दत्तः। राज्यसर्वकारः एतं अभियानं जन-आन्दोलनरूपेण अग्रे नतुं कार्यं कृतवान्। सः अकथयत् यत् सर्वासु विधानसभा-क्षेत्रेषु पञ्चायत-सार्वजनिक-भूमिषु च बृहत्-परिमाणे वृक्षारोपणस्य निर्णयः गृहीतः अस्ति। दुर्लभानां सङ्कटग्रस्तानां च वृक्ष-प्रजातीनां संरक्षणाय कृषकान् प्रोत्साहितुं योजना अपि विरच्यते। मुख्यमन्त्रिणा ज्ञापितं यत् प्रत्येकस्मिन् ग्रामे प्राकृतिक-प्राणवायुम् (Oxygen) वर्धयितुं 'पञ्चवटी' इति नाम्ना पादपारोपणं क्रियते। पञ्चविंशत्यधिक-द्विसहस्रतः षड्विंशत्यधिक-द्विसहस्र (२०२५-२६) वर्षे प्रदेशे कुलम् एकाधिक-पञ्चाशल्लक्षोत्तर-एककोटिः (१,५२,००,०००) पादपाः रोपिताः सन्ति। मुख्यमन्त्री प्रदेशे हरितिमां वर्धयितुं पादपानां परिचर्यायां च सक्रियाम् भूमिकां निर्वहतां ६१० (षट्शत-दश) वन-मित्राणां उल्लेखं कुर्वन् प्रत्येकं नागरिकात् स्व-स्व-क्षेत्रे स्थानीय-जलवायु-अनुकूलं पादपं रोपयितुम् आग्रहम् अकरोत्।

# क्रीडामन्त्री डॉ. मनसुख माण्डविया राष्ट्रमण्डल-क्रीडा-२०३० तथा ओलम्पिक-२०२८ इत्यनयोः सज्जतानां समीक्षां कृतवान्




क्रीडामन्त्री डॉ. मनसुख माण्डविया क्रीडकानां चयने अधिकां पारदर्शितां, क्रीडक-केन्द्रित-शासने तथा देशस्य क्रीडा-तन्त्रे संस्थागत-परिष्काराणाम् आह्वानम् अकरोत्। नवदिल्ली-नगरे आयोजितं राष्ट्रिय-क्रीडा-महासंघ-सम्मेलनम् सम्बोधयन् डॉ. माण्डविया अवदत् यत् सर्वेषाम् अंशधारकाणां कृते क्रीडकानाम् हितं कल्याणं च सर्वोपरि भवेत्। सः एतस्मिन् बलं दत्तवान् यत् केनापि क्रीडकेन सह अन्यायः न भवेत्। मादकद्रव्य-सेवनस्य (डोपिंग् इत्यस्य) विषये डॉ. माण्डविया भारतीय-क्रीडाभ्यः एतस्य सङ्कटस्य उन्मूलनाय एकां व्यापिकां रणनीतिम् आहूतवान्। सः अकथयत् यत् कार्यप्रक्रिया केवलं क्रीडकेभ्यः सीमिता न भवेत्, अपि तु निर्मातृभिः, आपूर्तिकर्तृभिः, सहायकादिभिः तथा उपयोक्तृभिः सहिता सम्पूर्णैव शृङ्खला एकेन पारदर्शिना दृढेन च तन्त्रेण सह नियन्त्रणीया।

क्रीडामन्त्री भारतस्य स्वदेशी-शिक्षण-तन्त्रस्य (कोचिंग-तन्त्रस्य) सुदृढीकरणस्य वैदेशिक-शिक्षकेषु अतिशय-निर्भरतायाः न्यूनीकरणस्य च आवश्यकतायां बलमददात्। अस्मिन् सम्मेलने राष्ट्रिय-क्रीडा-संघैः 'राष्ट्रिय-क्रीडा-प्रशासन-अधिनियमः, २०२५' इत्यस्य अनुपालनस्य, सुशासन-अभ्यासानां तथा 'एशियाई-क्रीडा-२०२६', 'लॉस एञ्जिलीस-ओलम्पिक-२०२८' तथा 'राष्ट्रमण्डल-क्रीडा-२०३०' इत्येतेषामर्थे भारतस्य सज्जीकरणानाम् समीक्षा कृता।

# हिमाचलप्रदेशविश्वविद्यालये अध्यापक-नियुक्तिप्रक्रियायां महद् परिवर्तनम्, नूतना नियुक्तिनीतिः स्वीकृता

**हिमसंस्कृतवार्ताः:- शिमला।** हिमाचलप्रदेशविश्वविद्यालये अध्यापक-नियुक्तिप्रक्रियायां महत् परिवर्तनं कृतम् अस्ति। विश्वविद्यालयस्य कार्यकारिणीपरिषदा अध्यापक-नियुक्तिनीतौ, नियुक्तिकार्यक्रमे च संशोधनं स्वीकृतम्। कार्यकारिणीपरिषदः सभायां निर्मितसमितेः अनुशंसाः अनुमोदिताः। तदनन्तरं कुलसचिवा ज्योतिराणा आदेशान् निर्गतवती। नूतनव्यवस्थायां आचार्यः (प्रो.), सह-आचार्यः (एसोसिएट प्रोफेसर), सहायक-आचार्य- (एसिस्टेंट- प्रोफेसर) पदानां चयनप्रक्रियायां साक्षात्कारस्य भूमिका अधिका कृता अस्ति। विश्वविद्यालयेन यूजीसी-विनियम-२०१८ इत्यस्य प्रावधानानि स्वीकृत्य शोधाङ्काः तथा शैक्षणिकाङ्काः केवलम् अभ्यर्थिनां प्रारम्भिक-छननपर्यन्तं सीमिताः कृताः। अन्तिमचयनं तु चयनसमितेः समक्षम् अभ्यर्थिनां प्रदर्शनस्य आधारेण भविष्यति। आचार्यः तथा सह-आचार्यपदयोः पात्राः अभ्यर्थिनः साक्षात्कारे सम्मिलिताः भविष्यन्ति।

## साक्षात्कारे न्यूनतमाङ्कप्राप्तिः अनिवार्या-

चयनार्थं साक्षात्कारे न्यूनतमाङ्कप्राप्तिः अनिवार्या भविष्यति। सामान्यवर्गस्य अभ्यर्थिनां कृते ५० प्रतिशताङ्काः, आरक्षितवर्गस्य कृते ४५ प्रतिशताङ्काः निर्धारिताः सन्ति। सहायकाचार्यनियुक्तौ अपि शैक्षणिकाङ्काः केवलं साक्षात्कारार्थम् अभ्यर्थिनां सूचीनिर्माणे उपयुज्यन्ते। विश्वविद्यालयेन पदानां सङ्ख्यानुसारं साक्षात्कारार्थम् अभ्यर्थिनाम् अधिकतमसङ्ख्या अपि निर्धारिता अस्ति। नूतननीत्यां आवेदनप्रक्रिया अपि स्पष्टतया निर्दिष्टा अस्ति। निर्धारितयोग्यतां न पूरयन्तः, अपूर्णानि आवेदनपत्राणि च निरस्तानि भविष्यन्ति। स्क्रीनिङ्गसमितिः आवेदनपत्राणां परीक्षणं करिष्यति। विश्वविद्यालयेन नियुक्तिप्रक्रियायां क्षैतिजारक्षणस्य अपि समावेशः कृतः। येषु प्रकरणेषु आरक्षितश्रेण्यां केवलम् एकः पात्रः अभ्यर्थी उपलब्धः भविष्यति, तत्र अपि सः चयनप्रक्रियायां सम्मिलितः भविष्यति। चयनसमितेः अनुशंसाः सक्षमप्राधिकारिणः अनुमोदनानन्तरं परिणामाः प्रकाशिताः भविष्यन्ति।

## सहायकाचार्यनियुक्तेः नूतनाः नियमाः-

सहायकाचार्यपदानां कृते विश्वविद्यालयेन लघुसूचीनिर्माणस्य व्यवस्था निर्धारिता अस्ति। एकस्मिन् पदे अधिकतमं २५ अभ्यर्थिनः साक्षात्कारार्थम् आमन्त्रिताः भविष्यन्ति। प्रत्येकं अतिरिक्तपदे १० अतिरिक्ताभ्यर्थिनः समावेश्यन्ते। एकस्मिन् पदे सति साक्षात्कारार्थं न्यूनातिन्यूनं पञ्च पात्राणि आवेदनपत्राणि तथा त्रयः सूचीबद्धाः अभ्यर्थिनः उपस्थिताः भवितुम् अनिवार्यता वर्तते। एकाधिकपदानां सति सप्त आवेदनपत्राणि तथा पञ्च अभ्यर्थिनः उपस्थिताः भवितुम् आवश्यकाः। येषु विषयेषु योग्याभ्यर्थिनां न्यूनता भविष्यति, तेषु कुलपतिः नियमानां विषये शिथिलतां प्रदातुं समर्थः भविष्यति।

## शोधप्रस्तुतेः अपि महत्त्वं भविष्यति-

नूतननियुक्तिनीतौ चयनप्रक्रियाकाले अभ्यर्थिनां शोधक्षेत्रस्य प्रस्तुतेः ग्रहणस्य अपि अनुशंसा कृता अस्ति। समित्या मन्यते यत् अध्यापकपदानां कृते केवलं शैक्षणिक-अभिलेखः पर्याप्तः नास्ति, अपितु शोधक्षमता तथा विषयविशेषज्ञता अपि समानरूपेण महत्त्वपूर्णे स्तः। चयनसमितिः साक्षात्कारकाले अभ्यर्थिनां शैक्षणिकक्षमता, विषयज्ञानं तथा शोधदृष्टिकोणं मूल्याङ्कयिष्यति।

# हमीरपुरस्य बड़सरे मुख्यमन्त्री सुक्खूः करिष्यति राज्यस्तरीय- स्वतन्त्रतादिवस- समारोहस्य अध्यक्षता,




**हिमसंस्कृतवार्ताः:- शिमला।** हिमाचलप्रदेशे १५ अगस्त २०२६ दिनाङ्के स्वतन्त्रतादिवस-समारोहः सोत्साहं परिपालयिष्यते। राज्यस्तरीयसमारोहः हमीरपुर- मण्डलस्य बड़सरे आयोजिष्यते। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुमहोदयः अस्य कार्यक्रमस्य अध्यक्षतां करिष्यति। एषः समारोहः प्रातः ११:०० वादने प्रारप्स्यते। राज्यसर्वकारेण मण्डलस्तरे अपि स्वतन्त्रतादिवस-समारोहाणां कृते मुख्यातिथीनाम् आवलिः (सूची) प्रसारिता अस्ति। अस्मिन् विधानसभाध्यक्षः, उपमुख्यमन्त्री विविधाः मन्त्रिणश्च विविधमण्डलेषु राष्ट्रध्वजम् उत्तोलयिष्यन्ति परेड-दलस्य अभिवाददनं च ग्रहीष्यन्ति। कुलदीपसिंहपठानियामहोदयः बिलासपुरे समारोहस्य अध्यक्षतां करिष्यति। उपमुख्यमन्त्री मुकेशअग्निहोत्री चम्बामध्ये राष्ट्रध्वजम् उत्तोलयिष्यति। स्वास्थ्यमन्त्री कर्नल (डॉ.) धनीरामशांडिलः सोलने कार्यक्रमस्य अध्यक्षतां करिष्यति। कृषिमन्त्री चन्द्रकुमारः काङ्गड़ामण्डलस्य धर्मशालायां समारोहे सम्मंस्यते। उद्योगमन्त्री हर्षवर्धनचौहानः कुल्लूमध्ये, राजस्वमन्त्री जगतसिंहनेगी किन्नौरमण्डलस्य रिकांगपियोमध्ये, शिक्षामन्त्री रोहितठाकुरः शिमलामध्ये कार्यक्रमस्य अध्यक्षतां करिष्यन्ति।

## अन्य-मण्डलेषु मुख्यातिथयः-

ग्रामीण- विकास- पञ्चायतीराजमन्त्री अनिरुद्धसिंहः ऊनामध्ये स्वतन्त्रतादिवस-समारोहस्य अध्यक्षतां करिष्यति। नगर-ग्राम-नियोजनमन्त्री राजेश धर्माणी सिरमौरमण्डलस्य नाहनमध्ये राष्ट्रध्वजम् उत्तोलयिष्यति। आयुषमन्त्री यादविन्दरगोमा मण्डीमध्ये कार्यक्रमस्य शोभां वर्धयिष्यति। विधायकः सुन्दरसिंहठाकुरः लाहौलस्पीति- मण्डलस्य केलांगमध्ये समारोहस्य अध्यक्षतां करिष्यति।

## सज्जतायै निर्देशाः-

हिमाचलप्रदेशसर्वकारस्य मुख्यसचिवेन सर्वे उपायुक्ताः आरक्षक-अधीक्षकाः च आवश्यकीः व्यवस्थाः निश्चिताः कर्तुं निर्दिष्टाः। एतेषां समारोहाणां सफल-आयोजनाय सर्वे सम्बद्धाः विभागाः सूचिताः सन्ति। सुरक्षाविषये अन्येषु प्रशासनिकपक्षेषु च विशेषं ध्यानं दातुं प्रोक्तम्, येन काऽपि अप्रिया घटना न भवेत्। एतत् निश्चितं करिष्यते यत् सर्वे कार्यक्रमाः सुचारुरूपेण सम्पन्नाः भवेयुः नागरिकाश्च उत्साहपूर्वकं भागं ग्रहीतुं शक्ष्यन्ति।

# मुख्यमन्त्रिणः विरुद्धं टिप्पणीकरणे सुधीरशर्मा राजेन्द्रराणा इत्यनयोः विरुद्धं प्राथमिकी पञ्जीकृता

**हिमसंस्कृतवार्ताः:- धर्मशाला।** मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः विरुद्धं सामाजिकमाध्यमेषु कथिताया अभद्रभाषायाः प्रयोगस्य, संतर्जनाप्रदानस्य च आरोपेण धर्मशालाविधानसभाक्षेत्रस्य विधायकः सुधीरशर्मणः विरुद्धं धर्मशालापुलिसथानके प्रकरणं पञ्जीकृतम् अस्ति। पुलिसविभागस्य अनुसारं ग्रामपञ्चायत-कल्याडायाः पूर्वप्रधानेन बलबीर चौधरिणा प्रदत्तस्य उपालम्भस्य आधारेण प्राथमिकी (एफआईआर) पञ्जीकृता अस्ति।
उपालम्भे आरोपः कृतः यत् विधायकः सुधीरशर्मा सामाजिकमाध्यमेषु मुख्यमन्त्रिणः विरुद्धम् अभद्रभाषायाः प्रयोगं कृतवान्, तस्मै च संतर्जनाम् अपि दत्तवान्। अस्याः उपालम्भस्य आधारेण पुलिसविभागेन भारतीयन्यायसंहितायाः (बीएनएस) धारा ३५२, ३५१(२) तथा ३५६(२) अन्तर्गतं प्राथमिकी पञ्जीकृत्य अन्वेषणं प्रारब्धम्। पूर्वविधायकः राजेन्द्रराणा इत्यस्य विरुद्धमपि प्राथमिकी पञ्जीकृता अस्ति। काङ्गडाजनपदस्य अपरपुलिसाधीक्षकः बीरबहादुरः अवदत् यत् पुलिसविभागः अस्य प्रकरणस्य सर्वेषां पक्षाणां सम्यक् अन्वेषणं करोति, तथा च अन्वेषणस्य आधारेण आगामी वैधानिकी कार्यविधिः प्रवर्तिता भविष्यति।

# सुन्दरसिंहठाकुरः भविष्यति मन्त्री! सुक्खू- मन्त्रिमण्डले लब्धुं शक्यते स्थानम्; हिमाचलस्य राजनैतिकक्षेत्रेषु उत्प्रेक्षाः तीव्राः



**हिमसंस्कृतवार्ताः:- शिमला ।** कुल्लूक्षेत्रात् काङ्ग्रेसविधायकस्य सुन्दरसिंहठाकुरस्य शीघ्रमेव प्रदेशमन्त्रिमण्डले सम्मेलनस्य चर्चाः पुनः तीव्राः जाताः। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू-महोदयेन एकेन सार्वजनिककार्यक्रमस्य अवसरे दत्तेन वक्तव्येन एतासां उत्प्रेक्षाणां कृते नूतना वायुः दत्ता।
कसुम्पटी- विधानसभाक्षेत्रस्य प्रवासकाले मुख्यमन्त्रिणा मञ्चात् सुन्दरसिंहठाकुरं प्रति सङ्केतं कुर्वता उक्तं यत् 'एते शीघ्रमेव मन्त्री भविष्यन्ति।' मुख्यमन्त्रिणः अस्य वक्तव्यस्य अनन्तरं राजनैतिकक्षेत्रेषु मन्त्रिमण्डलविस्तारस्य सम्भावनाः आधारीकृत्य चर्चाः तीव्राः संजाताः। प्रदेश-मन्त्रिमण्डले सम्प्रति एकस्य मन्त्रिणः पदं रिक्तम् अस्ति। मुख्यमन्त्री पूर्वम् अपि स्पष्टीकृतवान् यत् मन्त्रिमण्डलविस्तारस्य निर्णयः काङ्ग्रेस- उच्चनेतृत्वस्य स्वीकृत्याः अनन्तरमेव गृहीष्यते। यद्यपि तस्मिन् समये तेन कस्यापि सम्भाव्य-नाम्नः उल्लेखः न कृतः आसीत्, परन्तु अधुना सुन्दरसिंहठाकुरस्य विषये दत्तेन वक्तव्येन राजनैतिकाः उत्प्रेक्षाः इतोऽपि सुदृढाः कृताः। यदि निकटभविष्ये मन्त्रिमण्डलस्य विस्तारः भवति, तर्हि विधानसभायाः आगामि-मानसूनसत्रस्य अवसरे विधानसभा-उपाध्यक्षस्य रिक्त-पदस्य अपि पूरणस्य सम्भावना अस्ति। काङ्ग्रेस-प्रदेशाध्यक्षे जाते सति विनयकुमारस्य उपाध्यक्षपदात् त्यागपत्रदानात् एतत् पदं रिक्तम् अस्ति।

# राजकीयसंस्कृतशिक्षकपरिषदः बिलासपुरजनपदस्य प्रतिनिधिमण्डलम् शिक्षोपनिदेशकेन सह मिलितवान्



**हिमसंस्कृतवार्ता शिवा शर्मा)**
विगतदिने राजकीयसंस्कृतशिक्षकपरिषदः, बिलासपुरजनपदस्य कार्यकारिण्याः सदस्याः जिलाध्यक्षस्य डॉ.अशोककुमारस्य नेतृत्वे प्रारम्भिक-शिक्षायाः शिक्षोपनिदेशकेन श्रीअरुणगौतम-महाभागेन सह शिष्टाचारमेलनम् अकरोत् प्रतिनिधिमण्डलेन संस्कृतशिक्षकाणां वरिष्ठता-सूचीं शीघ्रप्रकाशनाय ज्ञापनं समर्पितम्, एवं प्रतिवर्षं जिला-प्रान्तस्तरीयसंस्कृतप्रतियोगितानां आयोजनं भवेदिति प्रार्थयन्तः प्रतिनिधयः शिक्षोपनिदेशकस्य माध्यमेन निदेशकाय ज्ञापनमपि प्रेषितवन्तः। शिक्षोपनिदेशकमहाभागः प्रतिनिधिमण्डलेन प्रस्तुतान् सर्वान् विषयान् सावधानतया संश्रुत्य संस्कृतशिक्षकाणां न्यायोचितानां याचनानां शीघ्रपूर्त्यर्थं यथाशक्तिं प्रयत्नं, करिष्यामीति आश्वासनम् प्रदत्तवान्। अस्मिन्नवसरे जिलाध्यक्षः डॉ.अशोककुमारः, महासचिवः श्री सौरभशर्मा शास्त्री, जिला-उपाध्यक्षः श्री अनुजगौतमशास्त्री, प्रवक्ता श्रीश्यामलालशास्त्री,परामर्शकः श्रीसुनीलकुमार-शास्त्री, घुमारवीं–१ खण्डाध्यक्षः श्री सुरेन्द्रशुक्लशास्त्री एवं पूर्व-जिलावित्तसचिवः श्री भूपरामशास्त्री इत्यादयः उपस्थिताः आसन्। मेलनानन्तरं जिला-कार्यकारिण्याः गोष्ठी अभवत्, यस्याम् परिषदः भावीकार्यक्रमाणां विषये विस्तृतरूपेण विचारविमर्शः जातः।

# संस्कृतमहाविद्यालये डोहग्यां दशदिवसीयस्य संस्कृतसम्भाषणशिविरस्य समापनम्





हिमसंस्कृतवार्ता। ऊनाजनपदस्य डोहगीस्थे सनातनधर्म-आदर्शसंस्कृतमहाविद्यालये विगत-दशदिनेभ्यः प्रचलतः दशदिवसीयस्य 'संस्कृतसम्भाषणशिविरस्य' अद्य समापनम् अभवत्। कार्यक्रमस्य समन्वयकः डॉ. ज्योतिषविभागस्य आचार्यः डा. मुकेशकुमारः शर्मा अकथयत् यत् एतत् शिबिरम् महाविद्यालये प्रथमवर्षे प्रविष्टानां नवागन्तुकविद्यार्थिनां कृते संस्कृतभाषां प्रति रुचिं जनयितुं दैनिकव्यवहारे च सहजसम्भाषणं शिक्षयितुम् आयोजितम् आसीत्। महाविद्यालयस्य प्राचार्यः डॉ. लालसिंहपठानिया कार्यक्रमस्य सफलसञ्चालनाय सर्वेषाम् अभिनन्दनं कृतवान्। समापनसमारोहस्य अध्यक्षतां महाविद्यालयस्य व्याकरणविभागस्य सहाचार्यः डॉ. केदारदत्तपुरोहितः अकरोत्। स्वकीये अध्यक्षीयोद्बोधने सः अवदत् यत् संस्कृतं केवलम् एका प्राचीना भाषा एव नास्ति, अपि तु अस्माकं भारतीयज्ञानपरम्परायाः संस्कृतेश्च आधारशिला अस्ति। ईदृशैः शिबिरैः छात्र-छात्राः न केवलं संस्कृतभाषणे समर्थाः भवन्ति, अपि तु स्वमूलैः सह अपि सम्बद्धाः भवन्ति। अस्य आयोजनस्य कृते सः सहयोगीसंस्थायाः 'संस्कृतभारती' इत्यस्याः आभारमपि प्राकटयत्।
कार्यक्रमस्य मुख्यवक्ता सम्भाषणशिबिरस्य च समन्वयकः डॉ. मुकेशकुमारशर्मा दशदिनानाम् गतिविधिनाम् विवरणं प्रस्तुतवान्। सः अकथयत् यत् शिबिरस्य अवधौ छात्रेभ्यः क्रीडया, गीतैः, अभिनयेन च व्यावहारिकसंस्कृतस्य अभ्यासः कारितः, येन तेषु संस्कृतभाषायाः शिक्षणं प्रति नवः आत्मविश्वासः जागृतः। समापनसमारोहे शिबिरार्थिनः संस्कृतसंवादम्, सम्भाषणम्, समूहगीतं च प्रस्तुत्य सर्वान् मन्त्रमुग्धान् अकुर्वन्। प्राक्शास्त्रिप्रथमवर्षीया छात्रा श्रुतिशर्मा शास्त्रिप्रथमवर्षीया मुस्कान च शिबिरस्य स्वानुभवान् प्रकटितवत्यौ। अवनीशः तस्य सहयोगिनः च संस्कृतसमूहगीतं तथा संजना एकलगीतं प्रस्तुतवती। शिवानी तस्याः सख्यः च संस्कृतसंवादं प्रस्तुत्य संस्कृतस्य सरलस्वरूपं प्रादर्शयन्। कार्यक्रमस्य सञ्चालनं महाविद्यालयस्य शास्त्री-द्वितीयवर्षस्य छात्रया सुश्रिया नेहया अत्यन्तकुशलतया प्रवाहपूर्णसंस्कृतेन कृतम्। कार्यक्रमे शिबिरस्य संयोजिका डॉ. अरुणादेवी सर्वेषामतिथीनाम्, प्राध्यापकानाम्, प्रतिभागीच्छात्राणां च धन्यवादं विज्ञापितवती। महाविद्यालयस्य प्राचार्यः प्रो. लालसिंहपठानिया कार्यक्रमस्य अध्यक्षः च अस्मिन् शिबिरे प्रशिक्षणदात्रीभ्यां संस्कृतभारत्याः विस्तारिकाभ्यां सुश्रीललितावर्मा-सुश्रीहितेश्वरीशर्माभ्यां महाविद्यालयस्य पक्षतः सम्मानम् अयच्छताम्। कल्याणमन्त्रेण सम्पूर्तिसत्रमिदं सम्पन्नतामगात्।

# बांकीपुर- दतिया- निर्वाचनपरिणामाः भाजपा- दलाय स्पष्टः सन्देशः, सवर्णसमाजः अधुना भ्रमितः न भविष्यति: जितेन्द्र मिश्रः



हिमसंस्कृतवार्ता:- राघवनाथ झा पटना।परशुराम-सेवासंघ- राष्ट्रीय- ब्राह्मणमहासभायाः राष्ट्रिय-संयोजकः प्रदेशाध्यक्षश्च जितेन्द्र मिश्रः उक्तवान् यत् बांकीपुर-दतिया (मध्यप्रदेश) क्षेत्रयोः निर्वाचनपरिणामैः इदं स्पष्टं सङ्केतं दत्तं यत् सवर्णसमाजः अधुना केवलं चुनावी-प्रतिश्रुतीनां राजनैतिक- आश्वासनानां च आधारेण निर्णयं न करिष्यति। सः आरोपितवान् यत् निर्वाचनकाले सवर्णसमाजं प्रभावितं कर्तुं राजनैतिकदृष्ट्या साधयितुं च प्रयत्नाः कृताः। सः भारत-तिवारी-हत्याकाण्डस्य उल्लेखं कुर्वन् अवदत् यत् यदा विविधानां समाजानां जनाः न्यायार्थं स्वरम् उत्थापयन्ति स्म, तदा अनेकमुख्यानाम् नेतॄणां सक्रियतायाम् प्रश्नाः उत्थापिताः। जितेन्द्र मिश्रः उक्तवान् यत् अनन्तरं दिल्लीनगरस्य सांसदेन मनोजतिवारी महोदयेन भारततिवारी- परिवारस्य मुख्यमन्त्रिणा सम्राटचौधरीमहोदयेन सह साक्षात्कृतः, किन्तु तस्य प्रश्नः अस्ति यत् घटनाकाले तत्परिवारस्य समर्थने व्यापकी राजनैतिक-पहलः किमर्थं न दृष्टा?सः अकथयत् यत् सवर्णसमाजः कस्यापि राजनैतिकदलस्य सम्पत्तिः नास्ति। समाजः अधुना सम्मानस्य, न्यायस्य, प्रतिनिधित्वस्य, अधिकारस्य च विषयेषु स्वयं निर्णयं कर्तुं समर्थः अस्ति। सः दावां कृतवान् यत् बांकीपुर- दतिया- निर्वाचनपरिणामाः भाजपा- सहित- सर्व- राजनैतिकदलेभ्यः स्पष्टः सन्देशः सन्ति यत् समाजः केवलं निर्वाचनकाले कृतैः प्रयत्नैः प्रभावितः न भविष्यति। मिश्रः अवदत्, "यः समाजस्य सुख-दुःखयोः पार्श्वे स्थास्यति, समाजः अपि लोकतान्त्रिकरीत्या तस्यैव समर्थनं करिष्यति। केवलं निर्वाचनकाले समाजस्य स्मरणस्य राजनीतिः अधुना स्वीकार्या न भविष्यति।" सः उक्तवान् यत् परशुराम-सेवासंघ- राष्ट्रीय- ब्राह्मण- महासभा सवर्णसमाजस्य सम्मानस्य, न्यायस्य, अधिकारस्य, राजनैतिक-सहभागितायाश्च कृते लोकतान्त्रिक-संवैधानिक-मार्गेण स्वकीयं स्वरम् अग्रे अपि उत्थापयिष्यति।

# हास्यकणिका

- विदुषी

पुत्रः मातरं पृच्छति- "अम्ब! भवत्या: केशाः कथं श्वेताः भवन्ति?"
माता वदति- "त्वादृशः आलसः निष्कर्मण्यः पुत्रः यस्याः भवति, तस्याः केशाः श्वेताः एव भवन्ति।"
पुत्रः- "इदानीं मया ज्ञातं मम मातामह्याः सर्वे केशाः किमर्थं श्वेताः अभवन्!" 😂 😅
माता 😳 😳 😳 😳 😳

# असमराज्ये भीषणजलप्लवनम् - कुमारभास्करवर्म-संस्कृतपुरातनाध्ययन-विश्वविद्यालयस्य संस्कृतभारत्याः च संयुक्ता श्रमदानयात्रा प्रारब्धा




**हिमसंस्कृतवार्ता डॉ . निशिकान्तपाण्डेयः** नलबारी असमः,।भारतस्य उत्तर-पूर्वसीमान्ते स्थितस्य असमराज्यस्य भूभागे साम्प्रतम् आपतितं जलप्लवनम् अतीव भयावहं भीषणं च रूपं धारितवत् अस्ति। अत्यन्तवृष्ट्या नदीनां वर्धितजलपरिमाणस्य कारणात् राज्यस्य अनेके जनपदाः पूर्णतया जलमग्नाः जाताः। अस्मिन् प्रकृतिकोपे बहवः जनाः स्वकीयान् गृहान्, जीवनोपयोगिवस्तूनि, पशुधनं च हृतवन्तः। सहस्रशः जनाः निराश्रिताः सन्तः सुरक्षिताश्रयस्थलानि अन्विष्यन्ति। अतः अस्यामापदि जलप्लवपीडितानां जनानां साहाय्यार्थम्, सेवाभावं पुरस्कृत्य, नलबारीजनपदे स्थितस्य प्रतिष्ठितस्य 'कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययन-विश्वविद्यालयस्य' तथा च 'संस्कृतभारत्याः उत्तर-असम-प्रान्तस्य' संयुक्ततत्वावधाने अद्य एकस्य महतः श्रमदान-कार्यक्रमस्य यात्रायाः आरम्भः अभवत्।
२०२६ तमवर्षस्य अगस्तमासस्य सप्तमे दिनाङ्के , अपराह्ने त्रिवादने अस्य ऐतिहासिकस्य श्रमदान-संघस्य प्रस्थानं जातम्। एतत् श्रमदानदलं मुख्यतया असमस्य अत्यधिकं प्रभावितं शिवसागरमण्डलं प्रति प्रस्थितम् अस्ति। शिवसागरमण्डले जलप्लवेन आपन्नानां जनानां तात्कालिक-साहाय्यं, स्वच्छता-कार्यं तथा च पुनर्वासकार्येभ्यः श्रमदानम् अस्याः यात्रायाः मुख्यमुद्देश्यमस्ति। एषः संघः श्वः प्रातः शिवसागरमण्डलं सम्प्राप्य स्वस्य सेवाकार्यं तीव्रगत्या प्रारप्स्यते।

## विश्वविद्यालयस्य कुलपतिवर्याणां प्रो. प्रह्लादजोशीमहोदयानां नेतृत्वम्

अस्य श्रमदानाभियानस्य सर्वथा प्रशंसनीयः पक्षः अस्ति । तेषां प्रेरणादायिना नेतृत्वेन विश्वविद्यालयस्य सर्वे अध्यापकाः, शोधच्छात्राः, सामान्यच्छात्राः, कर्मचारिणः च महता उत्साहेन अस्मिन् सेवायज्ञे सहभागिनः अभवन्। सहैव, संस्कृतभारत्याः उत्तर-असम-प्रान्तस्य अनेके निष्ठावन्तः समर्पणशीलाः च कर्तारः अपि अस्मिन् कार्ये सहभागिनः सन्ति। संस्कृतभारत्याः कार्यकतारः सदैव राष्ट्रिय-आपत्कालेषु सेवाकार्येभ्यः तत्पराः भवन्ति, अत्रापि तेषाम् उपस्थितिः संघस्य उत्साहं वृद्धिं करोति। विश्वविद्यालयस्य लोकयानेन अस्याः सेवायात्रायाः शुभारम्भः अभवत्। जलप्लवेन पीडितानां भ्रातॄणां भगिनीनां च दुःखमुन्मूलयितुम् सर्वेषां वदनेषु, मनःसु च दृढसङ्कल्पः स्पष्टं दृश्यते स्म।
अस्याः श्रमदानयात्रायाः सफलीभावाय तथा च शिवसागरस्य जलप्लवनपीडितानां शीघ्र-सामान्यजीवनाय सर्वे शुभकामनाः प्रकटयन्ति। श्रमदानकार्यक्रमस्य नेतृत्वं विश्वविद्यालयस्य कुलपतिना आचार्येण प्रह्लाद रा.जोशीमहोदयेन तथा च संस्कृतभारत्याः उत्तरासमप्रान्तस्य प्रान्तमन्त्रिणा श्रीपङ्कजशर्मणा च प्रदीयते।

# केन्द्रीय- संस्कृत- विश्वविद्यालयस्य नासिक- परिसराय ४१.५१ एकर-भूमेः अधिकाराभिलेखः समर्पितः



**हिमसंस्कृतवार्ताः- नासिकम्।** महाराष्ट्रस्य मुख्यमन्त्री श्रीदेवेन्द्रफडणवीसः केन्द्रीय- संस्कृत- विश्वविद्यालयस्य, नवदेहल्याः, प्रस्तावितस्य नासिकपरिसरस्य स्थापनार्थम् आबंटितभूमेः ७/१२ अधिकाराभिलेखम् औपचारिकरीत्या विश्वविद्यालयाय समर्पितवान्। अनेन सह नासिकपरिसरस्य विकासदिशि अन्यत् महत्त्वपूर्णम् उपलब्धिः संलग्ना जाता। अस्मिन् अवसरे केन्द्रीय- संस्कृत- विश्वविद्यालयस्य कुलसचिवः प्रो. आर. जी. मुरलीकृष्णः, मुख्यकार्यकारी अधिकारी मङ्गेश इन्दापवारः, नासिकजनपदस्य जिलाधिकारी आयुषप्रसादः, मण्डलायुक्तः डॉ. प्रवीणगेडामः, अन्ये वरिष्ठाधिकारिणश्च उपस्थिताः आसन्। विश्वविद्यालयाय आबंटिता भूमिः १६.८० हेक्टेयर अर्थात् प्रायः ४१.५१ एकर परिमिता अस्ति। एषा भूमिः नासिकस्य शिलापुरग्रामे प्रस्तावितस्य नासिक- रिङ्गमार्गस्य समीपे स्थिता अस्ति। भूमिसम्बद्धस्य अधिकाराभिलेखस्य विश्वविद्यालयाय समर्पणेन प्रस्तावितपरिसरस्य विकासप्रक्रियायाः अधिका गतिः भविष्यति।
भारतसरकारस्य शिक्षामन्त्रालयस्य अधीनस्थेन केन्द्रीय- संस्कृत- विश्वविद्यालयेन नासिकपरिसरः संस्कृतस्य, भारतीयज्ञानपरम्परायाः, आधुनिक-विज्ञानस्य, उद्भवमानप्रौद्योगिकीनां समन्वयाधारितः बहुविषयक- उच्चशिक्षाकेन्द्ररूपेण विकसितुं योजना कृता अस्ति। विश्वविद्यालयस्य कुलपतिना प्रो. श्रीनिवासवरखेड़ीवर्यस्य नेतृत्वे एषा महत्त्वाकाङ्क्षिणी परियोजना अग्रे नीयते। नासिकपरिसरस्य समग्रविकासाय प्रायः ३००–४०० कोटिरूप्यकाणाम् अनुमानितव्ययुक्ता विस्तृतपरियोजनाप्रतिवेदिका (डीपीआर) सज्जीकृता अस्ति। सा अनुमोदनार्थं वित्तीयसहायतार्थं च भारतसरकारस्य समीपे प्रस्तुतिकीर्तिता भविष्यति। नासिकपरिसरे संस्कृतेन सह आर्टिफिशियल इण्टेलिजेन्स् (एआई) तथा डाटा-विज्ञान विषययोः बी. टेक. पाठ्यक्रमस्य शुभारम्भः पूर्वमेव कृतः अस्ति। एषः अभिनवः शैक्षणिकप्रयासः भारतस्य प्रधानमन्त्रिणा नरेन्द्रमोदिना अपि उल्लिखिता अस्ति। परिसरस्य पूर्णरूपेण विकसिते सति विविधेषु शैक्षणिकपाठ्यक्रमेषु प्रायः १५०० विद्यार्थिनाम् अध्ययनव्यवस्था प्रस्ताविता अस्ति। नासिकपरिसरस्य स्थापनया अयं प्रदेशः संस्कृतस्य, अध्यात्मविद्यायाः तथा भारतीयज्ञानपरम्परायाः अध्ययनस्य प्रमुखकेन्द्रं भविष्यति। तेन सह आधुनिकविज्ञानस्य, प्रौद्योगिक्याः तथा उद्भवमानज्ञानविषयाणां उच्चशिक्षायाः अपि प्रमुखकेन्द्रत्वेन विकसितः भविष्यति। केन्द्रीय- संस्कृत- विश्वविद्यालयस्य एषः प्रयासः भारतस्य समृद्धज्ञानपरम्परायाः संरक्षणाय, संवर्धनाय, प्रसाराय, पारम्परिक- भारतीयज्ञानस्य आधुनिकविज्ञान-प्रौद्योगिकीभ्यां च सह सार्थकसमन्वयस्य दिशि महत्त्वपूर्णं पदम् इति मन्यते।

# अनुसूचितजाति-अनुसूचितजनजाति-आरक्षणे 'क्रीमी लेयर' (समृद्ध-वर्ग) सिद्धान्तस्य पक्षे नास्ति केन्द्रसर्वकारः, सर्वोच्चन्यायालये समर्पितं प्रतिज्ञापत्रम्




केन्द्रसर्वकारेण सर्वोच्चन्यायालये प्रतिज्ञापत्रं समर्पयन् उक्तं यत् अनुसूचितजातीनाम् (SC) अनुसूचितजनजातीनाम् (ST) च आरक्षणे 'क्रीमी लेयर' (समृद्ध-वर्गस्य) सिद्धान्तः प्रवृत्तः न भवति। सर्वकारेण तासां जनहितयाचिकानां विरोधः कृतः, यासु अनुसूचितजाति-अनुसूचितजनजाति-आरक्षणे 'क्रीमी लेयर' नियमं अधिसूचितं राजकीयसेवासु च अधिकां न्यायसङ्गतां आरक्षणनीतिं निर्मातुं प्रार्थना कृता आसीत्। केन्द्रेण उक्तं यत् याचिकासु संविधानस्य अन्तर्गतं कस्यापि मौलिकधिकारस्य उल्लङ्घनस्य उल्लेखः नास्ति। एतेन सह, वर्तमाने नियमे क्वापि एतत् प्रावधानं (विधानं) नास्ति यत् 'क्रीमी लेयर' नियमः अनुसूचितजाति-अनुसूचितजनजाति-वर्गयोः उपरि प्रवर्तितः भवति। सर्वकारानुसारम् एषा अवधारणा केवलं 'ओबीसी' (इतरेभ्यः पिछड़ेभ्यः वर्गेभ्यः) तथा 'एसईबीसी' (सामाजिक-शैक्षणिक-दृष्ट्या पिछड़ेभ्यः वर्गेभ्यः) आरक्षणेनैव सम्बद्धा अस्ति। ज्ञाप्यते यत् सर्वोच्चन्यायालयः गते वर्षे अगस्तमासस्य एकादशे दिनाङ्के रमाशङ्करप्रजापति-इत्यस्य तथा अन्येषाम् जनहितयाचिकासु केन्द्र-राज्यसर्वकारेभ्यः सूचनापत्रं (नोटिस) प्रेषितवान् आसीत्। याचिकायां निवेदितम् अस्ति यत् यदि कस्यापि अनुसूचितजाति-अनुसूचितजनजाति-परिवारस्य सदस्यः पूर्वमेव संवैधानिकं वरिष्ठं वा राजकीयपदं प्राप्तवान् अस्ति, तर्हि तस्य अपत्येभ्यः (सन्ततिभ्यः) आरक्षणस्य लाभः न प्रापणीयः। एतेन आरक्षणस्य लाभः आर्थिकदृष्ट्या दुर्बलेभ्यः आवश्यकतावद्भ्यः जनेभ्यः च अधिकं समानरूपेण प्राप्येत। याचिकाकर्तृभिः आर्थिकदृष्ट्या दुर्बलानां कृते उपश्रेणीं (सब-कैटेगरी) निर्माय तेभ्यः प्रवेशेषु राजकीयसेवासु च प्राथमिकतां दातुम् अपि निवेदनं कृतम्।

## केवलम् संसदः एव सूच्यां परिवर्तनस्य अधिकारः

सामाजिकन्याय-अधिकारिता-मन्त्रालयेन उक्तं यत् अनुसूचितजातीनाम् अनुसूचितजनजातीनाम् च सूच्यां कस्यापि प्रकारस्य परिवर्तनं केवलं संसदः एव कर्तुं शक्नोति। संविधानस्य ३४१ तथा ३४२ अनुच्छेदयोः अनुगुणेन कस्याश्चित् जातेः जनजातेः वा सूच्यां समावेशनस्य अपसारणस्य वा अधिकारः केवलं संसदि एव निहितः अस्ति। केन्द्रेण एतदपि उक्तं यत् एषा याचिका स्थापितनियमस्य अवहेलनां करोति। सर्वकारेण इन्दिरासाहनी (मण्डल-आयोग) अभियोगस्य उल्लेखं कुर्वता उक्तं यत् अनुसूचितजातीनाम्, अनुसूचितजनजातीनाम्, इतर-पिछडे-वर्गाणां च अभिज्ञानं ऐतिहासिक-सामाजिक-शैक्षणिक-पिछडेपनस्य (पृष्ठगामित्वात्) आधारेण भवति, केवलम् आर्थिकस्थितेः आधारेण न

# पाण्डुलिपीनां संरक्षणाय, अङ्कीकरणाय (डिजिटलीकरणाय) तथा अनुसन्धानस्य संवर्धनाय पाणिनिविश्वविद्यालये पाण्डुलिपिकेन्द्रस्य शुभारम्भः





**हिमसंस्कृतवार्ताः- डॉ.विजयकुमारः।** भारतसर्वकारस्य संस्कृतिमन्त्रालयस्य अधीनस्थायाः माननीय-प्रधानमन्त्रिणः महत्त्वाकाङ्क्षी-योजनायाः अन्तर्गतं पाण्डुलिपीनां संरक्षण-संवर्धन-अङ्कीकरण (डिजिटलीकरण)-अनुसन्धान-प्रकाशनादीनां प्रवर्धनार्थं विश्वविद्यालये ज्ञानभारतम् मिशनस्य निदेशकेन श्रीइन्द्रजीतसिंहेन पाण्डुलिपिकेन्द्रस्य उद्घाटनं कृतम्। अस्मिन् अवसरे पाण्डुलिपीनाम् अङ्कीकरणाय प्रयुज्यमानस्य यन्त्रस्यापि लोकार्पणम् अभवत्। स्वीयसम्बोधने श्रीइन्द्रजीतसिंहः अवदत् यत् भारतस्य ज्ञानसम्पदः पुनरुत्थानस्य महानुद्देशेन गतवर्षस्य सितम्बरमासे नवीदिल्ली-नगरे आयोजिते ज्ञानभारतम् अन्तर्राष्ट्रीयसम्मेलने माननीयप्रधानमन्त्री स्वयम् उपस्थितः अभवत् तथा ज्ञानभारतम्-पोर्टलस्य शुभारम्भमपि तेन कृतम्। सः उक्तवान् यत् विश्वविद्यालयस्य कुलगुरोः प्रो.शिवशङ्करमिश्रस्य संस्कृतभाषायाः प्रति समर्पणभावः, कर्मठता, नेतृत्वशक्तिश्च मध्यप्रदेशे ज्ञानभारतम्-अभियानस्य साफल्यं सुनिश्चितं करिष्यति। तेन अपि सूचितं यत् ज्ञानभारतम् मिशनस्य अन्तर्गतं अद्यावधि १ कोटि २२ लक्षाधिकाः पाण्डुलिपयः प्राप्ताः सन्ति, किन्तु तासां मध्ये प्रायः ५ लक्षपाण्डुलिपयः एव अङ्कीकरणपूर्वकं ज्ञानभारतं इत्यस्य पोर्टलमध्ये समारोपिताः सन्ति।

अध्यक्षीयोद्बोधने विश्वविद्यालयस्य कुलगुरुः प्रो.शिवशङ्करमिश्रः विश्वविद्यालयस्य पक्षतः माननीयप्रधानमन्त्रिणे श्रीनरेन्द्रमोदिनः धन्यवादं कृतम्। कुलगुरुणा उक्तं यत् प्रधानमन्त्री सर्वदा वैश्विकमञ्चे भारतीयसंस्कृतभाषायाः, संस्कृतेः, संस्काराणाञ्च संवर्धनस्य समर्थकः अस्ति। पाण्डुलिपिषु निहितं ज्ञानं विश्वस्य समक्षं प्रस्तूय सः ज्ञानस्य वैशिष्ट्यमयं सन्देशं प्रसारयति। तेन पुनरुक्तं यत् प्रधानमन्त्री श्रीनरेन्द्रमोदिना प्रवर्तितं ज्ञानभारतम् मिशनम् भारतीयज्ञानपरम्परायाः तथा पाण्डुलिपीनां संरक्षण-संवर्धनस्य जनजागरणार्थमेतिहासिकमभियानमस्ति। सः मध्यप्रदेशस्य राज्यपालाय श्रीमङ्गुभाईपटेलाय तथा मुख्यमन्त्रिणे डॉ. मोहनयादवाय अपि धन्यवादं निवेदितवान्। अश्विनीशोधसंस्थानस्य निदेशकः पुरातत्त्वविद् डॉ. आर. सी. ठाकुरः पाण्डुलिपिसंरक्षणस्य विविधपक्षान् प्रकाशयन् विश्वविद्यालयेन सह सम्पन्नस्य समझौतापत्रस्य आधारेण उभयसंस्थानयोः संयुक्तप्रयत्नानां आवश्यकता प्रतिपादितवान्। विक्रमविश्वविद्यालयस्य पूर्वकुलपतिः तथा सिन्धियाप्राच्यशोधसंस्थानस्य पूर्वनिदेशकः प्रो. बालकृष्णशर्मा पाण्डुलिपिसंरक्षणक्षेत्रे स्वस्य षट्त्रिंशद्वर्षीयानुभवान् समुपस्थापितवान्। राष्ट्रपतिपुरस्कारसम्मानितः प्रो. केदारनारायणजोशी भारतसर्वकारस्य तथा मध्यप्रदेशशासनस्य अभिनन्दनं कृत्वा महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयं एतत्कार्याय सर्वाधिकोपयुक्तं केन्द्रमिति निरूपितवान्। सः स्वसमीपे विद्यमानाः पाण्डुलिपयः विश्वविद्यालयाय दातुं संकल्पमपि व्यक्तवान्। साहित्यसाधकः पद्मश्री भगवतीलालराजपुरोहितः पाण्डुलिपीनां वैशिष्ट्यं भारतीयज्ञानपरम्परायां तासां महत्त्वञ्च विवेचितवान्। अस्मिन्नवसरे ज्ञानभारतम् मिशनस्य परियोजनानिदेशकः अनिर्वाणदासः अवदत् यत् एतत् संस्कृतविश्वविद्यालयं पाण्डुलिपिक्षेत्रे विशिष्टं कार्यं करोति, तथा विश्वविद्यालयस्य सर्वथा सहयोगाय वयं सदा प्रतिबद्धाः स्मः। कार्यक्रमे विश्वविद्यालयस्य कुलसचिवः प्रो. दिलीपसोनी, कार्यपरिषद्सदस्यः गौरवघाकडः, शिशिरपहाडी, डॉ.सुरेन्द्रशर्मा, अन्येषां संस्कृतमहाविद्यालयानां प्राचार्याः, आचार्याः, गणमान्याश्च उपस्थिताः आसन्। कार्यक्रमस्य सञ्चालनं विभागसमन्वयकमहोदयेन डॉ. तुलसीदासपरोहावर्येण कृतं तथा धन्यवादज्ञापनं ज्योतिर्विज्ञानविभागाध्यक्षेण डॉ. शुभम्शर्मणा कृतम्।

# पाटलिपुत्र-हरितक्षेत्र-उपग्रह-नगरस्य समग्र- विकासार्थम् उच्चस्तरीय- अन्तरविभागीय- परामर्श-उपवेशनस्य आयोजनम्




**समेकित-भविष्योन्मुख-नागरि विकासे बलप्रदानम्**

हिमसंस्कृतवार्ता:- राघव नाथ झा, पाटलिपुत्रम् (पटना) बिहारराज्यस्य विकास- आयुक्तेन मिहिरकुमारसिंहेन अध्यक्षतायां पाटलिपुत्र- हरितक्षेत्र-उपग्रहनगरस्य प्रारूप- विकासयोजना- २०४७ इति विषये विचार-विमर्शार्थं 'बिहार- नगरनियोजन एवं विकासपरिषद' इत्यस्याः सर्वै: सदस्यै:, सम्बद्धविभागानां वरिष्ठ- अधिकारिभि: सह उच्चस्तरीय- अन्तरविभागीय- हितधारक- परामर्श-उपवेशनम् आयोजितम्। नगरविकास तथा आवासविभागेन आयोजितस्य अस्य उपवेशनस्य उद्देश्यं पाटलिपुत्र- हरितक्षेत्र- उपग्रहनगरस्य प्रारूप-विकासयोजना- २०४७ इत्यस्य विविधपक्षेषु सर्वैः सम्बद्ध-विभागैः सह परामर्शं कर्तुं तथा तेषां परामर्शान् प्राप्तुम् आसीत्। उपवेशने विविधानां विभागानां वरिष्ठैः अधिकारिभिः स्व-परामर्शा: अपि प्रस्तुताः।

परामर्शकाले बिहारस्य विकास-आयुक्तेन उक्तं यत् नगरीकरणस्य वर्तमानायां प्रक्रियायां ग्रामीण- क्षेत्राणि तीव्रगत्या नागरिक-स्वरूपं धरन्ते, किन्तु बहुषु स्थानेषु आवश्यक-नागरिक-सुविधानां सुनियोजित-आधारभूत- संरचनायाः च समानान्तरविकासः भवितुं न शक्नोति। तादृश्यां स्थितौ हरितक्षेत्र-उपग्रहनगर-सदृशाः परियोजनाः केवलं नूतन-आवासीयक्षेत्राणां विकासाय परिमिताः न भूत्वा सुनियोजितस्य सुविधायुक्तस्य च नागरिकविकासस्य आदर्शप्रतिमानम् उपस्थापयितुं शक्नुवन्ति। तेन उक्तं यत् कालेन सह नगरनियोजनस्य अवधारणायां महत्त्वपूर्णं परिवर्तनं जातम्। आधुनिकनगरेषु रोजगारः, आवासः, वाणिज्यिक-गतिविधयः, संस्थागतसुविधाः, मनोरञ्जनं तथा सार्वजनिकसेवाः च परस्परं सम्बद्धाः सन्ति।

विकास-आयुक्तेन उक्तं यत् प्रस्तावितनगरस्य विकास-योजनायाः निर्माणकाले इयं केवलम् एका आवासीयपरियोजना इति रूपेण न द्रष्टव्या। निवासः, रोजगारः, वाणिज्यं, शिक्षा, स्वास्थ्यं, परिवहनं, हरित-क्षेत्रम् अन्याः नागरिक-सुविधाः च इत्येतेषां मध्ये श्रेष्ठसमन्वयस्य स्थापनम् आवश्यकं भविष्यति, येन भविष्ये जनाः मौलिकसेवानां कृते सुदूरं गन्तुं न बाध्येरन्। उपवेशनकाले नगरविकास तथा आवासविभागस्य प्रधानसचिवेन विनयकुमारेण पाटलिपुत्र- हरितक्षेत्र- उपग्रहनगरस्य प्रारूप-विकासयोजना- २०४७ इत्यस्य विस्तृतप्रस्तुतिं कुर्वता राष्ट्रिय- राज्यस्तरीय- नियोजनपरिप्रेक्ष्यं, क्षेत्रीय-नियोजन- संरचनाम्, वर्तमान-स्थितेः विश्लेषणम्, नगरस्य लक्ष्यं विकास-उद्देश्यानि, नियोजन-सिद्धान्तान्, स्थानिक-विकास-रणनीतिम् तथा प्रस्तावित- भूमि-उपयोगयोजनाम् अधिकृत्य विस्तारेण प्रकाशः पातितः। एतेन सह सामाजिक-आधारभूत-संरचना, गतिशीलता, यानान्तरण-उन्मुख-विकासः, आर्थिक- विकास- रणनीतिः, पर्यावरण- संरक्षणं, जल- हरित- अवसंरचना, जलवायु- अनुकूल-विकासः, अङ्कीय-अवसंरचना, दक्ष- नागरिक-प्रणाल्यः, चरणबद्धकार्यान्वयनं, निवेशरणनीतिः, विकासनियन्त्रणनियमाः, नगरसंरचनादिशानिर्देशाः च इत्येतेषु विषयेष्वपि विस्तारेण चर्चा कृता। अस्मिन् अवसरे योजना-तथा-विकास-विभागस्य अपर-मुख्यसचिवः डॉ. एन. विजयलक्ष्मीः, ग्रामीण- विकास-विभागस्य प्रधानसचिवः पंकजकुमारः, कृषिविभागस्य प्रधानसचिवः नर्मदेश्वरलालः इत्येतैः सह अन्येषां विभागानां वरिष्ठाः अधिकारिणः अपि उपस्थिताः आसन्।



हिमसंस्कृतवार्ता, ✍प्रदीपः
pradipnath997@gmail.com

# रजकस्य हीरकम्

कश्चन रजकः आसीत्। तस्य लघुः कश्चन गर्दभः आसीत्। सः रजकः तस्य गर्दभम् अतीव प्रीणाति स्म। गर्दभोऽपि स्वीयं स्वामिनम् अत्यन्तं प्रीणाति स्म, आदिनं च तस्य कार्यं करोति स्म।

एकदा सः रजकः स्वीयं गर्दभं नीत्वा मार्गे गच्छति स्म। तदा सः मार्गे कञ्चन प्रस्तरखण्डम् अपश्यत्। सः प्रस्तरखण्डः द्योतते स्म। रजकः तदा तं प्रस्तरखण्डम् उन्नीय अपश्यत् सः प्रस्तरखण्डः अतीव सुन्दरः आसीत्। तदानीं सः रजकः केनचित् दृढरज्जुना तं प्रस्तरखण्डं बद्ध्वा तस्य गर्दभस्य कण्ठे अधारयत्।

ततः सः रजकः सन्तुष्टः अभवत्, तस्य गर्दभोऽपि सन्तुष्टः अभवत्। एवमेव तौ उभावपि मार्गे चलतः स्म, तदानीं सहसा कश्चन मनुष्यः गर्दभस्य कण्ठे लम्बितं तं पाषाणखण्डम् अपश्यत्।


सः मनुष्यः अत्यन्तम् आश्चर्येण तं पाषाणं दृष्ट्वा अचिन्तयत्, एतत्तु हीरकमेव। एतद् हीरकमिति सः रजकः न जानाति इत्येवं विचिन्त्य सः मनुष्यः रजकस्य समीपं गत्वा अब्रवीत् भोः भ्रातः! भवान् गर्दभस्य कण्ठे पाषाणं किमर्थम् अलम्बयत्?

रजकः तदा अब्रवीत् महोदय! अहं मार्गे एतं प्राप्य मम प्रियस्य गर्दभस्य कण्ठे अधारयम्। तदारभ्य मम एषः गर्दभः अत्यन्तं सन्तुष्टः अपिच मम सर्वम् आदेशं सः मन्यते।

रजकस्य वचः श्रुत्वा सः मनुष्यः अचिन्तयत् यद् एषः रजकः एतस्य मूल्यं किम् इति न जानाति। एवं विचिन्त्य सः मनुष्यः रजकं लोभं दर्शयित्वा अब्रवीत् हे महोदय! एतं पाषाणं मह्यं ददातु, अहं भवते शतं रूप्यकाणि दास्यामि।

रजकः तस्य वचः श्रुत्वा किञ्चित् विचार्य अब्रवीत् नहि महोदय! अहं शतं रूप्यकाणि नीत्वा किं करिष्यामि! एतं पाषाणं प्राप्य तु मम गर्दभः सन्तुष्टः अस्ति, अहमपि सन्तुष्टः एव।

ततः सः मनुष्यः रजकेन सह वार्तां कुर्वन् अग्रे गच्छति स्म। सः रजकाय पञ्च शतं रूप्यकाणि दातुमपि



सज्जः अभवत् किन्तु सः रजकः तदपि निराकरोति स्म। सः मनुष्यः अत्यन्तं चतुरः आसीत्, अतः तं रजकम् अनुगच्छति स्म। तयोः वार्तालापसमये एकवारमपि सः मनुष्यः रजकं न अब्रवीत् यत् तत् हीरमकम् अस्ति इति। ततः रजकम् अनुगच्छन् सः मनुष्यः मार्गे किञ्चित् विरम्य दूरतः पश्यति स्म यत् सः कुत्र गच्छति इति। किञ्चित् अनन्तरं पुनः सः मनुष्यः रजकस्य समीपं धावित्वा गत्वा अपश्यत् गर्दभस्य कण्ठे तद् हीरकं नास्ति इति। ततः सः उच्चैः चीत्कारं कृत्वा रजकम् अब्रवीत् अरे महोदय! भवतः गर्दभस्य कण्ठात् पाषाणः कुत्र अगच्छत्? तदा रजकः विनयेन अब्रवीत् महाशय! भवान् यदा पृष्ठतः दूरे आसीत् तदा अन्यः कश्चन आगत्य मह्यं पञ्चाशत् सहस्रं रूप्यकाणि दत्वा एतं प्रस्तरखण्डं नीतवान्। रजकस्य तद् वचः श्रुत्वा सः मनुष्यः हताशः भूत्वा चीत्कारं कृत्वा रजकम् अब्रवीत् अरे मूर्ख! त्वं न जानासि तस्य पाषाणखण्डस्य मूल्यम्! तत्तु बहुमूल्यं रत्नं हीरकम् आसीत् यस्य मूल्यं दशलक्षं रूप्यकाणि आसीत्। रजकः तदा स्मित्वा अब्रवीत् महोदय! अहं तु न जानामि यद् एतस्य मूल्यं बहु अस्ति, किन्तु भवान् तु जानाति एव। तथापि भवान् मह्यं केवलं पञ्च शतं रूप्यकाणि हि दातुम् उद्यतः आसीत्। यदि भवान् मह्यं दशसहस्रं रूप्यकाणि अपि अदास्यत् तर्हि अहं सन्तुष्टः भूत्वा तद् हीरकं भवते हि अदास्यम्। अतः भवान् हि चिन्तयतु यत् मूर्खः अहम् उत भवान्!!



# वार्ता-संवादः

हिमसंस्कृतवार्ताः, ईदरधीररजः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अतीव विस्मयकरी वार्ता मया पठिता। एका तीर्थयात्रा अभूत् यस्याम् एकेन भक्तेन प्रचुरं सुवर्णं धृतम्। तस्य मूल्यं प्रायः विंशतिलक्ष-रूप्यकाणि अस्ति।

**नन्दिनी-** अहो! सुवर्णस्य भारः तु कष्टकरः। किन्तु अन्या वार्ता मया श्रुता। 'अमेरिका'-देशे एका महिला अस्ति। यस्य नरस्य यकृत् विंशति-वर्षेभ्यः पूर्वं तस्यै दत्तम्, तस्य नरस्य भ्रात्रा सह तया विवाहः निश्चितः।

**काव्या-** अद्भुतम्! एषः तु ईश्वरेण रचितः संयोगः। इदानीं तृतीया वार्ता मया उच्यते। एकेन कोटीश्वरेण व्यापारिणा एका कृत्रिमा 'रोलेक्स' घटी धृता। तेन उक्तम् यत् बहुमूल्या घटी धनस्य नाशाय एव।

**नन्दिनी-** सत्यम्, धनिकस्य एषः विचारः तु उत्तमः। परन्तु अन्तिमा वार्ता अतीव दुःखदायिनी। 'तरुण तेजपाल' नामकेन वामपक्षपातिना पत्रकारेण एका महिला बलात्कृता पुरा। तदा तेन उक्तम् यत् "अहं तव स्वामी अस्मि। अतः इदं सरलं भवति" इति।

**काव्या-** धिक् तम्! एतादृशः अपराधः तु सर्वथा निन्दनीयः। सा महिला महान्तं क्लेशम् अनुभूतवती अस्ति। अस्तु, अद्यतन-कार्यक्रमः अत्रैव समाप्यते।

# लौकिकन्यायकोशः

## चण्डालकन्यकान्यायः

डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्



कश्चन राजा कयाचित चण्डालकन्यकया सह विवाहं कृतवान्। एकदा द्वावपि विहारार्थं गच्छतः स्म। तदा एकः महर्षिः दृष्टः। सः राजा गजात् अवरुह्य तं महर्षिं नमस्कृतवान्। एतद्दृष्ट्वा सा चाण्डालकन्यका सः महर्षिरेव श्रेष्ठ इति चिन्तयित्वा तेन सह गन्तुमारब्धवती। मार्गे एकः शिवालयः दृष्टः। सः महर्षिः देवालये वर्तमानं शिवलिङ्गं नमस्कृतवान्। तत् दृष्ट्वा सा शिवः एव श्रेष्ठ इति चिन्तयित्वा महर्षिं परित्यज्य तत्रैव स्थिता। एकदा एक शुनकः आगत्य तस्य शिवलिङ्गस्य उपरि मूत्रविसर्जनं कृतवान्। तदा स शुनकः एव श्रेष्ठ इति भावयित्वा सा कन्यका शुनकम् अनुसृतवती। यदा सः शुनकः एकस्य चण्डालस्य समीपं गत्वा तं परितः भ्रमितुम् आरभत तदा सा चण्डालकन्यका सः चण्डाल एव श्रेष्ठ मत्वा तेन सह वासं कर्तुम् आरब्धवती। एवं मन्दबुद्धेः पूर्ववासनाकारणेन पूर्वस्थितिरेव अन्ततः प्राप्यत इति अनेन बोध्यते।चिन्तनीयः, मननीयः न्यायः एषः खलु??????

# अर्थवार्ता

## "वाहन-उद्योगेन विक्रयवृद्धिः २६% अधिका अस्ति

हिमसंस्कृतवार्ता रविः खरिडेहालः - बेङ्गलूरु।

२०२६-२७ तमे वर्षे प्रथमत्रिमासे वाहनविक्रयः २०२५-२६ तमे वर्षे तदनुरूपकाले २५.८९% वर्धितः । प्रथमत्रिमासे अन्ते संख्या २५,९१,१३८ इत्येव वर्धिता । जीएसटी तर्कसंगततायाः अनन्तरं गतवर्षस्य अन्तभागे विपणियाचनागतिः स्थापिता आसीत् । प्रथमत्रिमासे अन्ते गतवर्षे २०,५८,३२५ इति संख्याः आसन् । यात्रीवाहनानां विक्रयः ४,१६,५५५ आसीत् । पूर्ववर्षे एते ३,४९, ६७४ आसन् । एषा वृद्धिः १९.१३% अस्ति । अस्मिन् वर्षे प्रथमत्रिमासे २ चक्रीयवाहनानां विक्रयः १८,१८,२८९ संख्या आसीत्, गतवर्षे च १४,१७,७६७ संख्या आसीत् । २८.२५% वृद्धिः । अस्मिन् वर्षे ३ चक्रीयवाहनानां विक्रयस्य संख्या १,३३,७७८, पूर्ववर्षस्य संख्या १,१५,१६६ च आसीत् । वृद्धिः १६.१६% अस्ति । एतत् प्रथमं वर्षं यत् प्रत्येकं वर्गे वाहनानां विक्रये एतादृशी वृद्धिः अभवत् ।

# प्रहेलिका

**न मेऽस्ति रूपं न च दृश्यते मे,**
**प्राणं ददामि स्वयमेव नित्यम्।**
**चलानि सर्वत्र न चास्ति पादः,**
**वदन्तु कोऽहं सुधियो विचार्य?॥**

भावार्थः: मम रूपं नास्ति, अहं न दृश्ये (मुझे कोई देख नहीं सकता)। अहं सर्वेभ्यः नित्यं प्राणं ददामि (जीवन देता हूँ)। पादौ विना सर्वत्र चलामि (बिना पैरों के हर जगह बहता हूँ)। हे बुद्धिमन्तः! विचार्य वदन्तु, अहं कः अस्मि?

उत्तरम्: पवनः / वायुः (हवा)

२. **हस्ते समायाति न चास्ति कायः,**
**अक्षणि यच्छति जगत्प्रपञ्चम्।**
**श्रोत्रं मुखं तस्य च नैव दृश्यं,**
**शब्दैः सह क्रीडति कः स मित्रम्?॥**

भावार्थः: एतत् हस्ते समायाति (हाथ में आ जाता है), अस्य विशालः कायः (शरीर) नास्ति। नेत्राभ्यां संसारस्य चित्रम् दर्शयति। अस्य मुखं वा कर्णः न दृश्यते, किन्तु शब्दैः सन्देशैः च सह क्रीडति। एतत् किं यन्त्रम्?

उत्तरम्: दूरभाष-यन्त्रम् (स्मार्टफोन / मोबाइल)